दर्शनसुषमा

न्यायभाष्यरीत्या वेदाऽप्रामाण्यखण्डनम्

श्रीदास्. ए. बि

नैकानां दर्शनानां दार्शनिकानां च प्रथितस्थानं भवत्यस्मद्देशः। दर्शनानि द्विधा भिद्यन्ते। नास्तिकऽस्तिकभेदेन। सांख्ययोगन्यायवैशेषिकपूर्वोत्तरमीमांसाः आस्तिकदर्शनानि। चार्वाकबौद्धजैनानि नास्तिकानि। वेदप्रामाण्याङ्गीकारेन सांख्यादयः आस्तिकानि भवन्ति। अन्यानि तु तदनङ्गीकरणात् नास्तिकानि च। एतेषां आस्तिकदर्शनानां मध्ये अन्यतमं भवति न्यायदर्शनम्। न्यायभाष्यरीत्या वेदाप्रामाण्यखण्डनमत्र अवलोक्यते। प्रथमं तावत् पूर्वपक्षः - " तदप्रामाण्यं अनृतव्याघातपुनरुक्तदोषेभ्यः" [१]। तच्छब्देन शब्दविशेषो ज्ञाप्यते अर्थात् वेदाः उच्यन्ते। तथा च वेदाः अप्रमाणं, अनृतत्वात्, व्याघातत्वात् पुनरुक्ताच्च। अनृतत्वं नाम मिथ्यार्थबोधकत्वम्। एवं हि श्रूयते वेदेषु "पुत्रकामः पुत्रेष्ट्या यजेत" इति। अनुष्ठितायामपि इष्टौ पुत्रजन्म न दृश्यते इति अनृतत्वं दोषः। एवं च दृष्टार्थस्य वाक्यस्य अनृतत्वे अदृष्टार्थमपि वाक्यं " अग्निहोत्रं जुहुयात् स्वर्गकामः " इत्यादीनामपि वाक्यानां अनृतत्वमिति वेदाः अप्रमाणम्। व्याघातत्वं च पूर्वापरवाक्ययोः परस्परविरुद्धत्वम्। अग्निहोत्रं उद्दिश्य कालत्रयं विहितम्। उदिते होतव्यम्, अनुदिते होतव्यं, समयाध्युषिते होतव्यम् इति। समयाध्युषितं नाम प्रातः नक्षत्रमण्डलाऽदर्शनसूर्योदययोः मध्यवर्तिः कालः। एवं विहितं होमं दूषयति वेदे एव " श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति। शवलोऽस्याहुतिमभ्यवहति योऽनुदिते जुहोति। श्यावशवलौ वास्याहुतिमभ्यवहरतः यः समयाध्युषिते जुहोति" [२]। एवं कालत्रयं विहितं, कालत्रयस्यापि दोषो उक्तः। एवं व्याघातत्वात् वेदाः अप्रामाणम्।

किञ्च ' त्रिः प्रथममन्वाह त्रिरुत्तमाम् ' इति श्रूयते। प्रथमां ऋचं त्रिवारं अन्तिमां ऋचं त्रिवारं च वक्तव्यमिति। एवं पठितस्य पुनरुक्तिरिति वेदाः अप्रामाणम् इत्येवं

पूर्वपक्षः। एवं प्राप्ते सिद्धान्तः उच्यते - " न कर्मकर्तृसाधनवैगुण्यात् " [३]। अर्थात् पुत्रकामेष्टिवाक्यस्य अप्रामाण्यं नास्ति। कृतायामपीष्ट्यां पुत्रजन्माऽभावः कर्मकर्तृसाधनवैकल्यादेव भवति। तथा हि पुत्रकामेष्ट्यनन्तरं मातापितरौ ऋतुकाले संयुज्यमानौ पुत्रं जनयतः। अत्र इष्टिः करणं, पितरौ कर्तारौ, संयोगश्च कर्म। त्रयाणां गुणयोगात् पुत्रजन्म। अन्यतमस्य वैकल्ये सति पुत्रजन्माऽभावः। तत्र इष्ट्याश्रयं कर्मवैगुण्यं तावत् क्रियाभ्रंशः यथा कर्तव्यं तथा न कृतमिति। कर्तृवैगुण्ये हि प्रयोक्ता अविद्वान् अर्थात् कर्मस्वरूपवेत्ता न भवति। हविः उक्तसंस्काररहितं चेत् अथवा अपक्वं, दग्धं, भ्रष्टं, वा भवति चेत् तत्साधनवैगुण्यम्। एवं मन्त्राणां स्वरवर्णादिहीनत्वं, दक्षिणायाः असत्प्रतिग्रहादिप्राप्तवं, अल्पत्वं, दानाऽयोग्यत्वं, इत्यादयः साधनवैगुण्ये अन्तर्भवन्ति। अथ उपजनाश्रयं अर्थात् पुत्रोत्पादने कर्मवैगुण्यं तावत् पित्रोः मिथ्यासम्प्रयोगः। कर्तृवैगुण्यं हि स्त्रियः गर्भधारणाऽशक्तिः पुरुषस्य शुक्रादिदोषविशिष्टत्वं इत्यादयः साधनवैगुण्यं च इष्ट्यादिक्रियावैगुण्यमेव। लोकेऽपि अस्य उदाहरणं द्रष्टुं शक्यम्। " अग्निकामः दारुणि मथ्नीयात् " इत्यत्र कर्तृवैगुण्यं हि मन्थनाज्ञानं, शक्त्यभावः इत्यादयः। साधनवैगुण्यं हि दारोः आर्द्रता सुषिरमित्यादिः। एवं कर्मकर्तृसाधनवैगुण्ये सति इति न तद्बोधकवाक्यस्य अप्रमाण्यम्। अनन्तरसूत्रं भवति " अभ्युपेत्य कालभेदे दोषवचनात् " [४] इति। अनेन सूत्रेण व्याघातदोषो नास्तीति प्रतिपाद्यते। अग्न्याधानकाले होमाय कालत्रयेषु एकं स्वीकृत्य तादृशस्वीकृतकालस्य परित्यागे प्रतिपादितः। तथा हि यदि उदितहोमकर्ता अनुदिते समयाध्युषिते वा जुहोति तत्र " श्यावो वा " इत्यादिभिः वाक्यैः दोषः उक्तः। अतः एतादृशनिन्दावाक्यैः होमविधायकवाक्यानां व्याघाताभावात् न अप्रमाण्यशङ्का।

अथ अनन्तरं सूत्रं " अनुवादोपपत्तेश्च [५] " इति। सूत्रेणानेन पुनरुक्तदोषः निवार्यते। अनर्थकः प्रयोजनहीनः अभ्यासः पुनरुक्तः। स एव दोषः। अर्थवान् अभ्यासस्तु अनुवादः स तु न दोषः। " पञ्चदशसामधेनीः अन्वाह " इति श्रूयते। तत्र तु एकादशसंख्याकाः ऋचः एव पठ्यन्ते। तत्र एकादशसंख्याकऋचां पञ्चदशत्वप्राप्त्यै " त्रिः प्रथममन्वाह त्रिरुत्तमाम् " इति पठ्यन्ते। प्रथमायाः अन्तिमायाः च ऋचः त्रिवाराभ्यासेन पञ्चदशत्वं प्राप्यते इति अभ्यासस्यास्य सप्रयोजनत्वात् नोक्तदोषः इति न अप्रामाण्यापत्तिः। कथं

तर्हि वेदस्य प्रमाणमिति चेत् " मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यं आप्तप्रामाण्यात् " इति। तद्वेदवाक्यं प्रामाण्यं आप्तप्रामाण्यात् मन्त्रायुर्वेदप्रामाण्यवत् इति।

References :

१. न्यायभाष्यम् २-१-५७
२. तत्रैव
३. न्यायभाष्यम २-१-५८
४. न्यायभाष्यम २-१-५९
५. न्यायभाष्यम २-१-६०

सहायकग्रन्थाः

- न्यायभाष्यम्, वात्स्यायनमुनिप्रणीतं, (पण्डितश्रीसुदर्शनाचार्यकृत प्रसन्नपदव्याख्या संवलितं बौद्धभारती वारणासी।
- न्यायशास्त्रानुशीलनम्, किशोरनाथ झा, एकेडमी प्रेस्, दारगंज, इलहाबाद -२११००६.

English Books

- A History of Indian Logic, S.C. Vidyabhushan, Motilal Banarsidass Publishers, Delhi, 1920.
- The History and Bibliography of Nyāya Vaiśeṣika Literature, Gopinath Kaviraj, Published by Laxmi Narayan Tiwari, Varanasi.

•...•